"आह्निको नैकदृक् चैव शिलायूपः शितः
शुचिः ॥")

शितद्रुः, स्त्री, शतद्रुनदी । इत्यमरः ॥ शतलज् इति ख्याता ॥ चौरमोरटः । इति रत्नमाला ॥

शितशूकः, पुं, ( शितं निशितं शूकं यस्य । ) यवः । इत्यमरः ॥ दन्त्यादिरित्येके इति भरतः ॥ गोधूमः । इति त्रिकाण्डशेषः ॥

शितिः, त्रि, ( श्यति सौचो धातुः + "क्रमितमिश्यतिस्तम्भामत इच्च ।" उणा० ४।१२१ । इति इन् । स च कित् । अत इकारश्च । ) शुक्लः । कृष्णः । ( यथा, माघे । १५ । ४८ ।

"शितितारकानुमिततान्त्र-
नयनमरुणीकृतं क्रुधा ॥")

भूर्जवृक्षे, पुं । इति मेदिनी ॥ यथा च ।

"शितिस्त्रिषु सिते कृष्णे भूर्जे सारेऽपि च द्वयोः"
इति शब्दरत्नावली ॥

शितिकण्ठः, पुं, (शितिः कण्ठे यस्य ।) शिवः । इत्यमरः ॥ ( यथा, भागवते । ४ । ३ । १२ ।

यासां व्रजद्भिः शितिकण्ठ ! मण्डितं
नभो विमानैः कलहंसपाण्डुभिः ॥")

दात्यूहपक्षी । इति त्रिकाण्डशेषः ॥ ) यथा, महाभारते । १ । ८० । ६ ।

"यदा तु तान् वितुदन्ते वयांसि
तथा गृध्राः शितिकण्ठाः पतङ्गाः ॥" )

शितिचारः, पुं, शाकविशेषः । यथा,—

"शितिचारः सुतपुच्चो वितन्नं सुनिषण्णकम् ॥"
इति जटाधरः ॥

शितिच्छदः, पुं, (शिती छदौ यस्य ।) हंसः । इति शब्दरत्नावली ॥

शितिपक्षः, पुं, ( शिती शुक्लौ पक्षौ यस्य । ) हंसः । इति शब्दरत्नावली ॥

शितिसारकः, पुं, (शितिः सारो यस्य ।) तिन्दुवृक्षः । इत्यमरः ॥

शिथिलं, त्रि, ( श्रथ + "अजिरशिशिरशिथिलेति ।" उणा० १ । ५४ । इति किरच्प्रत्ययेन साधुः । ) श्लथः । इति हेमचन्द्रः ॥ ( यथा, भागवते । ४ । २८ । १५ ।

"शिथिलावयवो यर्हि गन्धर्व्वैर्हृतपौरुषः ॥")

शिथिलं, क्ली, (श्रथ + किरच् ।) मन्दबन्धनम् । मन्थरत्वम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ संयोगविशेषः । यथा,—

"प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ।"
इति भाषापरिच्छेदः ॥

"प्रचय इति मूले शिथिलाख्य इति किञ्चिदवयवावच्छेदेनावयवान्तरसंयोगिनि महत्त्ववति अवयवे वर्त्तमानः संयोगः प्रचय इत्येके । अत्र महत्त्वपद न देयं परमाणुसंयोगस्य प्रचयत्वेऽपि न क्षतिरित्यन्ये । भूयोऽवयवावच्छेदेनावयवान्तरसंयोगिन्यवयवे वर्त्तमानः संयोगः प्रचयः तेन परमाणुसंयोगो द्व्यणुकसंयोगो वा न प्रचय इत्यपरे ।" इति सिद्धान्तमुक्तावलीटीकादिनकरी ॥

शिनिः, पुं, क्षत्त्रियभेदः । इत्युणादिकोषः ॥ (यथा महाभारते । २ । ४ । ३० ।

"अक्रूरः कृतकर्म्मा च सत्यकश्च शिनेः सुतः ॥")

शिनेर्नप्ता, [ऋ] पुं, सात्यकिः । इति त्रिकाण्डशेषः ॥

शिपिविष्टः, पुं, शिपिविष्टः । इत्यमरटीकायां रमानाथः ॥

शिपिः, पुं, रश्मिः । यथा,—

"शैत्यात् शयनयोगाच्च शिपिवारि प्रचक्षते ।
तत्पानाद्रक्षणाच्चैव शिपयो रश्मयो मताः ।
तेषु प्रवेशात् विप्रेन्द्र शिपिविष्ट इहोच्यते ॥"
इति व्यासवचनम् ॥

शिपिविष्टः, पुं, खलतिः । दुश्चर्म्मा । महेश्वरः । इत्यमरः ॥ कुष्ठी । इत्यमरटीकायां रायमुकुटः ॥ अस्य रूपान्तरम् । शिपविष्टः । शिपिविष्टः । इत्यमरटीका ॥ विष्णुः यथा,—

"तेजोरूपी बृहद्रूपः शिपिविष्टः प्रकाशनः ॥"
इति तस्य सहस्रनामस्तोत्रं रमानाथश्च ॥

(पशुप्रविष्टे, त्रि । यथा, भागवते ।४।१३।३५ ।

"पुरोडाशं निरवपन् शिपिविष्टाय विष्णवे ॥"

"शिपिषु पशुषु यज्ञरूपेण प्रविष्टाय । तथाच श्रुतिः यज्ञो वै विष्णुः पशवः शिपिः यज्ञ एव पशुषु प्रतितिष्ठतीति ।" इति श्रीधरस्वामी ॥)

शिप्रः, पुं, सरोवरविशेषः । यथा,—

"एवं विवाह्य विधिवत् सौवर्णे मानसाचले ।
अरुन्धतीं वशिष्ठस्तु मोदमाप तया सह ॥
तत्र यत् पतितं तोयं मानसाचलकन्दरे ।
विवाहावभृतार्थाय शान्त्यर्थं वसुधाकृतम् ॥
ब्रह्मविष्णुमहादेवपाणिभिः समुदीरितम् ।
तत्तोयं सप्तधा भूत्वा पतितं मानसाचलात् ॥
हेमाद्रेः कन्दरे सानौ सरस्याञ्च पृथक् पृथक् ।
तत्तोयं पतितं शिप्रे देवभोग्ये सरोवरे ।
तेन शिप्रा नदी जाता विष्णुना प्रेरिता
क्षितिम् ॥"
इति कालिकापुराणे २३ अध्यायः ॥

शिप्रा, स्त्री, नदीविशेषः । यथा,—

"ततो हिमवतः प्रस्थे प्रतीच्यां तत्पुरस्य च ।
शिप्रं नाम सरः पूर्णं ददृशुर्द्दिविषादयः ॥
तद्वृहत्स्थानमासाद्य ब्रह्मशक्रादयः सुराः ।
उपविष्टा यथान्यायं पुरस्कृत्य महेश्वरम् ॥
तं शिप्रसंज्ञकासारं मनोज्ञं सर्व्वदेहिनाम् ।
शीतामलजलं सर्व्वैर्गुणैर्मानससम्मितम् ॥
दृष्ट्वा क्षणं हरस्तस्मिन् सौत्सुक्योऽभूद्विचक्षणे ।
शिप्रां नाम नदीं तस्मान्निःसृतां दक्षिणोदधिम् ।
गच्छन्तीञ्च ददर्शासौ पावयन्तीं जगज्जनान् ॥"
इति कालिकापुराणे १९ अध्यायः ॥

( हनुः । यथा, ऋग्वेदे । ८ । ६५ । १० ।

"उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः ।"

"शिप्रे हनू ।" इति तद्भाष्ये सायणः ॥ )

शिफः, पुं, शिफा । इत्यमरटीकायां विद्याविनोदः ॥

शिफा, स्त्री, वृक्षाणां जटाकारमूलम् । शिकड़ इति ख्यातम् । तत्पर्य्यायः । जटा । २ । इत्यमरः ॥ मूलम् ३ । इति जटाधरः ॥ नदी ( यथा ऋग्वेदे । १ । १०४ । ३ ।

"इति ते स्नातां प्रवणे शिफायाः ।"

"शिफायाः शिफा नाम नदी तस्याः ।" इति तद्भाष्ये सायणः ॥ ) मांसिका । माता । इति मेदिनी ॥ शतपुष्पा । हरिद्रा । इति राजनिर्घण्टः ॥ पद्मकन्दः । इति मुकुटधृतस्वामी ॥ (लता । इति मेधातिथिः ॥ यथा, मनौ । ८ । २३० ।

"शिफाविदलरज्ज्वाद्यैर्विदध्यान्नृपतिर्द्दमम् ॥)

शिफाकः, पुं, (शिफा इव । कन् ।) पद्ममूलम् । इति शब्दरत्नावली ॥

शिफाकन्दः, पुं, (शिफायुक्तः कन्दो यस्य ।)पद्ममूलम् । तत्पर्य्यायः । करहाटः २ । इत्यमरः ॥ शिफाकः ३ । इति शब्दरत्नावली ॥ पद्मकन्दः ४ कर्कटः ५ । इति जटाधरः ॥ शिफा ६ कन्दः ७ । इति मुकुटधृतस्वामी ॥

शिफाधरः, पुं, ( शिफाया धरः ।) शाखा । इति शब्दचन्द्रिका ॥

शिफारुहः, पुं, ( शिफाया रोहतीति । रुह + कः । ) वटवृक्षः । इति राजनिर्घण्टः ॥

शिम्बड़ी, स्त्री, क्षुपविशेषः । चाक्नोनि इति हिन्दीभाषा । तत्पर्य्यायः । मतिदा २ वक्रा ३ पङ्क्त्यहारिणी ४ द्रवन्ती ५ वातघ्नी ६ गुच्छपुष्पी ७ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । वातदृष्टशूलनाशित्वम् । रसायने युक्ता चेत् देहदार्ढ्यकारित्वञ्च । इति राजनिर्घण्टः ॥

शिम्बः, पुं, चक्रमर्द्दकः । इति शब्दचन्द्रिका ॥

शिम्बा, स्त्री, (शिम्ब + टाप् ।) कलयादित्वक् । सुँटी इति छिमड़ा इति च भाषा । तत्पर्य्यायः । शमी २ । इत्यमरः ॥ सिम्बा ३ सिम्बी ४ शिम्बी ५ शिम्बिका ६ शमी ७ सिम्बिका ८ शिम्बिः ९ । इति शब्दरत्नावली ॥ शमिः १० । इति हेमचन्द्रः ॥

शिम्बिः, स्त्री, शिम्बा । इति हेमचन्द्रः ॥ एरका । इति भावप्रकाशः ॥

शिम्बिकः, पुं, कृष्णमुद्गः । यथा,—

"कृष्णो प्रवरवासन्तहरिमन्थजशिम्बिकाः ॥"
इति हेमचन्द्रः ॥

शिम्बिका, स्त्री, (शिम्बि + कन् । टाप् ।) शिम्बा इति शब्दरत्नावली ॥

शिम्बिपर्णिका, स्त्री, (शिम्बिपर्णी + स्वार्थे कन् ।) मुद्गपर्णी । इति रत्नमाला ॥

शिम्बिपर्णी, स्त्री, ( शिम्बेः पर्णमिव पर्णमस्याः । ङीष् ।) मुद्गपर्णी । इति शब्दचन्द्रिका ॥

शिम्बी, स्त्री, ( शिम्बि + पक्षे ङीष् । ) शिम्बा । इति शब्दरत्नावली ॥ ( यथा, राजतरङ्गिण्याम् । १ । १११ ।

"भुक्त्वाने कच्छगुच्छानां शिम्बीरम्बुजलोचने ॥
मुद्गपर्णी । कपिकच्छुः । इति राजनिर्घण्टः ।

शिरः, पुं, पिप्पलीमूलम् । इति मेदिनी । मस्तकम् । इति जटाधर ॥ ( यथा,—